# कक्ष्या - X

प्रश्नसञ्चयः अक्कादमिक - संस्कृतविद्यालयानां कृते (Part I)

# एककम् - ५ संस्कृतिः

# पाठः ५ सुयोधनस्य राजनीतिः

## 1. प्रश्ननिर्देशः।

श्लोकं पठित्वा अधोदत्तानां प्रश्नानाम् उत्तराणि लिखत।

**प्रश्नपाठः - 1**

विशङ्कमानो भवतः पराभवं
नृपासनस्थोऽपि वनाधिवासिनः।
दुरोदरच्छद्मजितां समीहते
नयेन जेतुं नगतीं सुयोधनः।।

1. पराजयम् इत्यर्थे श्लोके प्रयुक्तं पदं किम्?
2. कः समीहते?
3. कां जेतुं समीहते?
4. 'ज्ञातुम्' एतादृशमन्यत् अव्ययपदं श्लोकाद् चित्वा लिखतु।

**पाठ्यचर्योद्देश्यम्।**

श्लोकं पठित्वा आशयं स्वांशीकरोति।

**मानसिकव्यापारः**

आशयावगमः, विवेचनं च।

समयः - 10 निमेषाः

अङ्काः - 4

**मूल्यनिर्णयसूचकाः** उचितस्य उत्तरस्य कृते एकैकोऽङ्कः।

| | | |
|---|---|---|
| **उत्तरम् -** | 1. | पराभवम् |
| | 2. | सुयोधनः |
| | 3. | जगतीम् |
| | 4. | जेतुम् |

## 2. प्रश्ननिर्देशः।

सुयोधनस्य शासनम् अधिकृत्य सूचनानुसारं टिप्पणीं लिखत।

**प्रश्नपाठः - 2**

सूचनाः -

- कुटिलमतिः सुयोधनः।
- दुर्जनसंसर्गापेक्षया प्रियम्।
- पुरुषार्थं नयेन विस्तार्यते।
- शासने समदर्शनम्।
- सुखेन जीवनम्।

**पाठ्यचर्योद्देश्यम्।**

संस्कृतकाव्यानि पठित्वा टिप्पणीलेखनम्।

**मानसिकव्यापारः**

आशयापग्रथनम्, आशयप्रकटनं च।

समयः - 10 निमेषाः

अङ्काः - 5

| | | | |
|---|---|---|---|
| **मूल्यनिर्णयसूचकाः** | सूचनानुसारम् आशयस्य स्वीकाराय | - | 2 |
| | वाक्यपूर्णतायै | - | 2 |
| | क्रमबद्धलेखनाय | - | 1 |
| | **आहत्य** | - | **5** |

## 3. प्रश्ननिर्देशः।

सुयोधनः निष्पक्षतया दण्डप्रयोगं करोति इत्याशयप्रतिपादकं श्लोकं विवेचयत।

**प्रश्नपाठः - 3**

विधाय रक्षान्परितः परेतरा-
नशङ्किताकारमुपैति शङ्कितः।
क्रियापवर्गेष्वनुजीविसात्कृताः
कृतज्ञतामस्य वदन्ति सम्पदः।।

वसूनि वाञ्छन्न वशी न मन्युना
स्वधर्म इत्येव निवृत्तकारणः।
गुरूपदिष्टेन रिपौ सुतेऽपि वा
निहन्ति दण्डेन स धर्मविप्लवम्।।

**पाठ्यचर्योद्देश्यम्।**

राजशासनसम्बन्धिनां श्लोकानां ज्ञानम्।

**मानसिकव्यापारः**

आशयापग्रथनं, विवेचनं च।

समयः - 5 निमेषाः

अङ्काः - 2

**मूल्यनिर्णयसूचकाः** उचितश्लोकस्य चयनाय पूर्णाङ्कः।

**उत्तरम् -** वसूनि धर्मविप्लवम्

**अङ्कौ - 2**

## 4. प्रश्ननिर्देशः।

उचितम् उत्तरं कोष्ठाद् निर्धार्य लिखत।

**प्रश्नपाठः - 4**

उपमा कालिदासस्य इतिवत् भारविमधिकृत्य प्रथा का?

(पदलालित्यं, अर्थगौरवं, रमणीयता)

**पाठ्यचर्योद्देश्यम्।**

कविं काव्यशैलीं च परिचिनोति।

**मानसिकव्यापारः**

आशयग्रहणं, विवेचनं च।

समयः - 1 निमेषः

अङ्कः - 1

**मूल्यनिर्णयसूचकाः** उचितस्य उत्तरस्य एकोऽङ्कः।

**उत्तरम् -** अर्थगौरवम्।

## 5. प्रश्ननिर्देशः।

मातृभाषायां विवर्तयत।

**प्रश्नपाठः - 5**

उत्तररामचरितस्य प्रणेता महाकविः भवभूतिः। सः महानुभावः सप्तमे शताब्दे महाराष्ट्रे विदर्भप्रान्ते पद्मपुरे स्वजीवनं यापयामास। तस्य पिता नीलकण्ठः माता जातुकर्णा च आसीत्। मालतीमाधवं, महावीरचरितं च तस्य अन्यौ नाटकग्रन्थौ। 'उत्तरे रामचरिते भवभूतिर्विशिष्यते' इति उक्तिः प्रसिद्धा वर्तते।

**पाठ्यचर्योद्देश्यम्।**

भाषान्तरीकरणसामर्थ्यसम्पादनम्।

**मानसिकव्यापारः**

आशयापग्रथनम्, मातृभाषायां समानपदचयनम्।

समयः - 15 निमेषाः

अङ्काः - 5

**मूल्यनिर्णयसूचकाः** एकैकस्य वाक्यस्य विवर्तनाय एकैकोऽङ्कः।

# पाठः ६ यागाश्वबन्धनम्

## 1. प्रश्ननिर्देशः।

सम्भाषणांशान् पूरयत।

**प्रश्नपाठः - 1**

दिनेशः - नमस्ते! ....................................।

अनिता - नमस्ते! अहं संस्कृतनाटकं द्रष्टुं नाट्यगृहं गच्छामि।

दिनेशः - संस्कृतनाटकं वा? ....................................।

अनिता - उत्तररामचरितम्।

दिनेशः - तस्य कर्ता कः?

अनिता - ....................................।

दिनेशः - तस्य नाटकस्य इतिवृत्तं कस्मात् स्वीकृतम्?

अनिता - ....................................।

दिनेशः - अस्तु। अहमपि आगच्छामि।

**पाठ्यचर्योद्देश्यम्।**

सम्भाषणांशान् पूरयति।

**मानसिकव्यापारः**

आशयग्रहणं, स्मरणं च।

समयः - 10 निमेषाः

अङ्काः - 4

**मूल्यनिर्णयसूचकाः** उचितस्य पूरणस्य कृते एकः अङ्कः।

**उत्तरम् -** दिनेशः - कुत्र गच्छसि?

दिनेशः - नाटकस्य नाम किम्?

अनिता - भवभूतिः।

अनिता - रामायणात्।

## 2. प्रश्ननिर्देशः।

सूचनानुसारं कथां विपुलीकुरुत।

**प्रश्नपाठः - 2**

सूचनाः -
- अश्वमेधम्।
- अश्वरक्षकः।
- आश्रमसमीपम्।
- वटवः।
- कौसल्यादीनाम् आश्रमोपगमनम्।
- लवदर्शनम्।
- वीरस्य भावम्।
- यागाश्वबन्धनम्।

**पाठ्यचर्योद्देश्यम्।**

नाटकांशं कथारूपेण परिवर्तयति।

**मानसिकव्यापारः**

अपग्रथनम्, आशयग्रहणं, क्रमीकरणं च।

समयः - 15 निमेषाः

अङ्काः - 5

**मूल्यनिर्णयसूचकाः**

| | | |
|---|---|---|
| सूचनास्वीकाराय | - | 2 |
| आशयपूर्णतायै | - | 2 |
| कथास्वरूपस्य | - | 1 |
| **आहत्य** | **-** | **5** |

## 3. प्रश्ननिर्देशः।

यथोचितं योजयत।

**प्रश्नपाठः - 3**

| क | ख |
|---|---|
| कृष्णभागवतर् | ईश्वरदर्शनम् |
| भारविः | जातककथा |
| तपोवनस्वामी | उत्तररामचरितम् |
| भवभूतिः | पञ्चतन्त्रम् |
| आर्यशूरः | किरातार्जुनीयम् |
| | हरिकथा |

**पाठ्यचर्योद्देश्यम्।**

विविधसाहित्यरूपाणि परिचिनोति।

**मानसिकव्यापारः**

कवीन् कृतींश्च विवेचयति।

समयः - 10 निमेषाः

अङ्काः - 5

**मूल्यनिर्णयसूचकाः** उचितस्य उत्तरस्य एकैकोऽङ्कः।

**उत्तरम् -**

| | |
|---|---|
| कृष्णभागवतर् | हरिकथा |
| भारविः | किरातार्जुनीयम् |
| तपोवनस्वामी | ईश्वरदर्शनम् |
| भवभूतिः | उत्तररामचरितम् |
| आर्यशूरः | जातककथा। |

## 4. प्रश्ननिर्देशः।

उदाहरणानुसारं सन्धिच्छेदं लिखत।

**प्रश्नपाठः - 4**

उदाः - गावः + चरन्ति - गावश्चरन्ति। एवं चेत् वराकश्चरतु -....................

**पाठ्यचर्योद्देश्यम्।**

सन्धिकार्याणि प्रत्यभिजानाति।

**मानसिकव्यापारः**

अपग्रथनं, तारतम्यम्।

समयः - 1 निमेषः

अङ्कः - 1

**मूल्यनिर्णयसूचकाः** उचितस्य विश्लेशणस्य एकोऽङ्कः।

**उत्तरम् -** वराकः + चरतु।

## 5. प्रश्ननिर्देशः।

मातृकानुसारं समस्तपदं लिखत।

**प्रश्नपाठः - 5**

मातृकाः - तालेन सह वर्तते - सतालम्।
गर्वेण सह वर्तते - ....................।

**पाठ्यचर्योद्देश्यम्।**

समस्तपदं प्रत्यभिजानाति।

**मानसिकव्यापारः**

अपग्रथनं, तारतम्यम्।

समयः - 1 निमेषः

अङ्कः - 1

**मूल्यनिर्णयसूचकाः** उचितस्य पूरणस्य एकोऽङ्कः।

**उत्तरम् -** सगर्वम्।

## 6. प्रश्ननिर्देशः।

उचितम् उत्तरं चित्वा लिखतु।

**प्रश्नपाठः - 6**

धिक् ...............। किमुक्तवानसि? (चापलं, चापलेन, चापलाय)

**पाठ्यचर्योद्देश्यम्।**

प्रयोगविशेषं जानाति।

**मानसिकव्यापारः**

आशयग्रहणं, विवेचनम्।

समयः - 1 निमेषः

अङ्कः - 1

**मूल्यनिर्णयसूचकाः** उचितस्य उत्तरस्य एकोऽङ्कः।

**उत्तरम् -** चापलम्।

**7. प्रश्ननिर्देशः।**

उदाहरणानुसारम् उचितं रूपं लिखत।

**प्रश्नपाठः - 7**

उदा - अनेन अश्वेन न किमपि प्रयोजनम् - कृतम् अश्वेन।

अनेन विवादेन न किमपि प्रयोजनम् - ...................।

**पाठ्यचर्योद्देश्यम्।**

प्रयोगविशेषं जानाति।

**मानसिकव्यापारः**

आशयग्रहणं, स्मरणं च।

समयः - 1 निमेषः

अङ्कः - 1

**मूल्यनिर्णयसूचकाः** उचितस्योत्तरस्य एकोऽङ्कः।

**उत्तरम्** कृतं विवादेन।

**8. प्रश्ननिर्देशः।**

उचितम् उत्तरं निर्धार्य लिखत।

**प्रश्नपाठः - 8**

'भगवन्तं प्राचेतसं पश्य'। प्राचेतसं इत्यनेन कः उद्दिष्टः?

(वाल्मीकिः, लवः, चन्द्रकेतुः)

**पाठ्यचर्योद्देश्यम्।**

कथापात्राणि परिचिनोति।

**मानसिकव्यापारः**

स्मरणं, विवेचनम्।

समयः - 1 निमेषः

अङ्कः - 1

**मूल्यनिर्णयसूचकाः** उचितस्य उत्तरस्य एकोऽङ्कः।

**उत्तरम् -** वाल्मीकिः।

## 9. प्रश्ननिर्देशः।

कोष्ठकात् उचितम् उत्तरं निर्धार्य लिखत।

**प्रश्नपाठः - 9**

धिक् ..........................। पराक्रमं स्त्रीषु मा भवतु।

(जाल्मन्, जाल्मान्, जाल्मेन)

**पाठ्यचर्योद्देश्यम्।**

प्रयोगविशेषं जानाति।

**मानसिकव्यापारः**

उचितपदविवेचनम्।

समयः - 1 निमेषः

अङ्कः - 1

**मूल्यनिर्णयसूचकाः** उचितस्य उत्तरस्य एकोऽङ्कः।

**उत्तरम् -** जाल्मान्।

## 10. प्रश्ननिर्देशः।

उचितम् उत्तरं निर्धार्य लिखत।

**प्रश्नपाठः - 10**

उत्तररामचरितस्य इतिवृत्तं कस्मात् स्वीकृतम् ?

(महाभारतात्, रामायणात्, पञ्चतन्त्रात्)

**पाठ्यचर्योद्देश्यम्।**

साहित्यरूपाणि परिचिनोति।

**मानसिकव्यापारः**

उचितोत्तरविवेचनम्।

समयः - 1 निमेषः

अङ्कः - 1

**मूल्यनिर्णयसूचकाः** उचितस्य उत्तरस्य एकोऽङ्कः।

**उत्तरम् -** रामायणात्।

## 11. प्रश्ननिर्देशः।

उचितम् उत्तरं निर्धार्य लिखत।

**प्रश्नपाठः - 11**

श्रीरामस्य अश्वमेधयागे अश्वरक्षकः कः ?

(लक्ष्मणः, जनकः, चन्द्रकेतुः)

**पाठ्यचर्योद्देश्यम्।**

कथापात्राणि परिचिनोति।

**मानसिकव्यापारः**

आशयग्रहणम्।

समयः - 1 निमेषः

अङ्कः - 1

**मूल्यनिर्णयसूचकाः** उचितस्य उत्तरस्य एकोऽङ्कः।

**उत्तरम् -** चन्द्रकेतुः।

# पाठः ७ केरलीयकलारूपाणि

## 1. प्रश्ननिर्देशः।

चाक्यार्कूत्त् पाठकम् इति कलारूपयोः साजात्यवैजात्यानि मञ्जुषातः चित्वा लिखत।

**प्रश्नपाठः - 1**

(क्षेत्रकला, वाद्योपकरणं नास्ति, श्लोकानां व्याख्यानम्, पुराणकथा, हास्यरसः, वाद्योपकरणमस्ति, भक्तिरसः।)

| | ***चाक्यार्कूत्त्*** | ***पाठकम्*** |
|---|---|---|
| साजात्यानि | ................................. | ................................. |
| | ................................. | ................................. |
| वैजात्यानि | ................................. | ................................. |
| | ................................. | ................................. |

**पाठ्यचर्योद्देश्यम्।**

कलारूपाणां परिचयसम्पादनम्।

**मानसिकव्यापारः**

अपग्रथनम्, आशयावबोधः, विवेचनं च।

समयः - 10 निमेषाः

अङ्काः - 5

| | | | |
|---|---|---|---|
| **मूल्यनिर्णयसूचकाः** | त्रयाणां साजात्यानां लेखनाय | - | 3 |
| | द्वयोः वैजात्ययोः लेखनाय | - | 2 |
| | **आहत्य** | **-** | **5** |

| उत्तरम् - | *चाक्यार्कूत्त्* | *पाठकम्* |
|---|---|---|
| साजात्यानि | क्षेत्रकला | क्षेत्रकला |
| | पुराणकथा | पुराणकथा |
| | श्लोकानां व्याख्यानम् | श्लोकानां व्याख्यानम् |
| वैजात्यानि | हास्यरसः | भक्तिरसः |
| | वाद्योपकरणमस्ति | वाद्योपकरणं नास्ति |

## 2. प्रश्ननिर्देशः।

गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत।

### प्रश्नपाठः - 2

कूटियाट्टं प्राचीना देवालयकला भवति। इदं संस्कृतनाटकाभिनयस्य प्रकारभेदः एव। अत्र सात्विकः, वाचिकः, आङ्गिकः, आहार्यश्चेति चतुर्विधाः अभिनयाः सन्ति। मिषाव्, तालम्, इटक्का, शङ्खः प्रभृतयः वाद्यविशेषाः अनुवाद्यरूपेण उपयुज्यन्ते। कूटियाट्टे स्त्रीपुरुषपात्रयोः समं प्राधान्यमस्ति। चाक्यारः नङ्ङियारः च मिलित्वा नटनं कुरुतः इत्यतः कूटियाट्टम् इति नाम। महाराजस्य कुलशेखरवर्मणः कालादारभ्यैव कूटियाट्टस्य प्रचारः प्रचुरः आसीत्। तदर्थं तोलः तस्य साहाय्यम् अकरोदिति ऐतिह्यमप्यस्ति।

1. कूटियाट्टे कतिविधाः अभिनयाः सन्ति?
2. 'अकरोदिति' अस्य पदच्छेदं लिखत?
3. 'कूटियाट्टम्' इति नाम कथं सञ्जायते?
4. खण्डिकातः 'तुल्यम्' इत्यर्थकं पदं विविच्य लिखत।

### पाठ्यचर्योद्देश्यम्।

गद्यांशं पठित्वा आशयम् अवगच्छति।

### मानसिकव्यापारः

अपग्रथनं, निर्णयः।

समयः - 15 निमेषाः

अङ्काः - 4

**मूल्यनिर्णयसूचकाः** उचितस्य उत्तरस्य कृते एकैकोऽङ्कः।

**उत्तरम् -**
1. चतुर्विधाभिनयः।
2. अकरोत् + इति।
3. चाक्यारः नङ्ङ्यारः च मिलित्वा नटनं कुरुतः।
4. समम्।

## 3. प्रश्ननिर्देशः।

यथोचितं योजयत।

**प्रश्नपाठः - 3**

| | अ | आ |
|---|---|---|
| 1. | चाक्यार्कूत्त् | नृत्तम् |
| 2. | पाठकम् | उत्तरकेरले प्रचारमाप्ता कला |
| 3. | पूरक्कलि | चम्पूप्रबन्धः |
| 4. | कलरिप्पयट्ट् | सत्कथाकालक्षेपः |
| 5. | हरिकथा | खलूरिका |
| | | भक्तिभावः |

## पाठ्यचर्योद्देश्यम्।

विविधकलारूपाणि परिचिनोति।

## मानसिकव्यापारः

अपग्रथनं, विवेचनं च।

समयः - 10 निमेषाः

अङ्काः - 5

**मूल्यनिर्णयसूचकाः** उचितस्य उत्तरस्य एकैकोऽङ्कः।

**उत्तरम् -**
1. चाक्यार्कूत्त् चम्पूप्रबन्धः
2. पाठकम् भक्तिभावः

| | | |
|---|---|---|
| 3. | पूरक्कलि | उत्तरकेरले प्रचारमाप्ता कला |
| 4. | कलरिप्पयट्ट् | खलूरिका |
| 5. | हरिकथा | सत्कथाकालक्षेपः |

## 4. प्रश्ननिर्देशः।

निर्दिष्टसूचनामनुसृत्य कलरिप्पयट् इति कलारूपम् अधिकृत्य टिप्पणीं लिखत।

**प्रश्नपाठः - 4**

सूचनाः -

- आयोधनकला।
- 'कलरि' नामकं परिशीलनस्थानम्।
- शास्त्रपठनम्।
- खलूरिका।
- प्रणेता।
- अन्यकलासु स्वाधीनता।

### पाठ्यचर्योद्देश्यम्।

विविधानां कलारूपाणां परिचयसम्पादनम्।

### मानसिकव्यापारः

आशयापग्रथनम्, आशयप्रकटनं च।

समयः - 10 निमेषाः

अङ्काः - 5

**मूल्यनिर्णयसूचकाः**

| | | |
|---|---|---|
| सूचनानुसारम् आशयस्य स्वीकाराय | - | 2 |
| वाक्यपूर्णतायै | - | 2 |
| क्रमबद्धलेखनाय | - | 1 |
| **आहत्य** | - | **5** |

## 5. प्रश्ननिर्देशः।

सूचनानुसारं हरिकथा इति कलारूपमधिकृत्य टिप्पणीं लिखत।

**प्रश्नपाठः - 5**

सूचनाः -
- पुराणकथा।
- नामान्तराणि।
- द्रविडदेशे।
- विविधवाद्योपकरणानि।
- प्रभाषणचातुरी।
- रसाविष्कारः।
- वेषभूषादयः।
- समञ्जसमेलनम्।

## पाठ्यचर्योद्देश्यम्।

विविधानां कलारूपाणां परिचयसम्पादनम्।

## मानसिकव्यापारः

आशयापग्रथनम्, आशयप्रकटनं च।

समयः - 10 निमेषाः

अङ्काः - 5

| **मूल्यनिर्णयसूचकाः** | | | |
|---|---|---|---|
| | सूचनानुसारम् आशयस्य स्वीकाराय | - | 2 |
| | वाक्यपूर्णतायै | - | 2 |
| | क्रमबद्धलेखनाय | - | 1 |
| | **आहत्य** | - | **5** |

## 6. प्रश्ननिर्देशः।

मातृभाषायां विवर्तयत।

**प्रश्नपाठः - 6**

केरलीयक्रैस्तवानां मध्ये प्रचुरप्रचारमाप्तं कलारूपं भवति मार्गकली। तस्याः सुरियानी विभागस्थानां क्रैस्तवानां मध्ये प्राचुर्यं दृश्यते। क्रैस्तवधर्मस्य प्रचारणाय भारतमागतस्य तोमाश्लीहामहाभागस्य भारतप्रवेशः तस्य प्रवर्तनानि च गानात्मकतयाऽत्र प्रस्तूयन्ते। प्रज्वलितं दीपं परितः मण्डलाकारेण स्थित्वा द्वादशो स्त्रियः पुरुषाः वा गानपुरस्सरं नृत्यन्ति। अवतारकाः क्रैस्तवानां परम्परागतवेषं धरन्ति।

**पाठ्यचर्योद्देश्यम्।**

भाषान्तरीकरणसामर्थ्यसम्पादनम्।

**मानसिकव्यापारः**

अपग्रथनं, मातृभाषायां समानपदचयनं, तारतम्यं च।

समयः - 10 निमेषाः

अङ्काः - 5

**मूल्यनिर्णयसूचकाः** एकैकस्य वाक्यस्य विवर्तनाय एकैकोऽङ्कः।

# पाठः ८ सुरायाः असुरता

## 1. प्रश्ननिर्देशः।

रमेशगोपालयोः सम्भाषणे रिक्तस्थानानि पूरयत।

**प्रश्नपाठः - 1**

रमेशः - भोः गोपालः! अद्यतनदिनपत्रिकायां प्रधानवार्ता का?

गोपालः - .....................................।

रमेशः - अहो! विषमद्यपानेन त्रिंशत् जनाः मृताः? अतीव दुःखकरम्।

गोपालः - मृतेषु .....................................।

रमेशः - हन्त! विंशत्यधिकाः युवकाः। मद्यवर्जनाय जनानां बोधवत्करणम् आवश्यकमेव।

गोपालः - .....................................।

रमेशः - तदर्थं लघुलेखां निर्माय वितरणं कर्तुं शक्यते। .....................................।

गोपालः - लघुलेखायां मद्यपानस्य दोषाः अवश्यं लेखनीयाः।

**पाठ्यचर्योद्देश्यम्।**

सम्भाषणरचनायै सामर्थ्यं सम्पादयति। निर्दिष्टविषयानुसारम् आशयविपुलीकरणम्।

**मानसिकव्यापारः**

अपग्रथनं, निगमनं, निर्देशानुसारं रचना।

समयः - 12 निमेषाः

अङ्काः - 4

| **मूल्यनिर्णयसूचकाः** | | | |
|---|---|---|---|
| 1. | विषमद्यपानेन त्रिंशत् जनाः मृताः इति | - | 1 |
| 2. | विंशत्यधिकाः युवकाः एव | - | 1 |
| 3. | बोधवत्करणाय किं कर्तुं शक्यते | - | 1 |
| 4. | लघुलेखायाम् अवश्यं किं लेखनीयम् | - | 1 |
| | **आहत्य** | - | **4** |

## 2. प्रश्ननिर्देशः, प्रश्नपाठश्च।

उदाहृतवत् मद्यपानस्य निराकरणमधिकृत्य भित्तिपत्रिकां रचयतु।

उदा - मद्यं वर्जयतु

आरोग्यं संरक्षतु।।

## पाठ्यचर्योद्देश्यम्।

उन्मादकवस्तूनां निराकरणाय उद्बोधनम् आवश्यकम् इति प्रत्यभिजानीते।

## मानसिकव्यापाराः

आशयावगमः प्रयोगं च।

समयः - 4 निमेषाः

अङ्कौ - 2

| **मूल्यनिर्णयसूचकाः** | | |
|---|---|---|
| वाक्यघटना | - | 1 |
| आशयव्यक्तता | - | 1 |
| **आहत्य** | - | **2** |

## 2. प्रश्ननिर्देशः।

मातृभाषायां विवर्तयत।

**प्रश्नपाठः - 7**

अर्णोस् पातिरिः क्रिस्तुधर्मप्रचारणार्थमेव केरलान् प्राप। द्वात्रिंशत् वर्षाणि यावत् सः अत्र अध्यवसत्। अस्मिन् काले अयं भारतीयं औपनिषदं धर्मं संस्कृतभाषां च अधीतवान्। अनेन महाशयेन रचिताः ग्रन्थाः विदेशीयानां संस्कृतपठने अत्यन्तं उपकारकाः भवन्ति। कैरल्यामपि बहवः ग्रन्थाः अनेन रचिताः।

## पाठ्यचर्योद्देश्यम्।

भाषान्तरीकरणसामर्थ्यसम्पादनम्।

## मानसिकव्यापारः

अपग्रथनम्, आशयग्रहणं, मातृभाषायां समानपदचयनम्।

समयः - 10 निमेषाः

अङ्काः - 5

**मूल्यनिर्णयसूचकाः** एकैकस्य वाक्यस्य विवर्तनाय एकैकोऽङ्कः।

# एककम् - ६ वास्तुविद्या
# पाठः ९ दिशानिर्णयः

## 1. प्रश्ननिर्देशः।

सूचनानुसारं दिशानिर्णयमधिकृत्य टिप्पणीं लिखत।

**प्रश्नपाठः - 1**

सूचनाः -
- भूमिसमीकरणम्।
- शङ्कुस्थापनम्।
- वृत्तरचना।
- छायानुसारम् अङ्कनम्।
- पुनः छायानिरीक्षणम्, अङ्कनम्।
- पूर्वपश्चिमरेखानिर्माणम्।
- यमसूत्रनिर्माणम्।
- दिशानिर्णयः।

## पाठ्यचर्योद्देश्यम्।

वास्तुरीत्या दिशानिर्णयज्ञानं सम्पादयति।

## मानसिकव्यापारः

अपग्रथनम्, आशयग्रहणं, स्मरणं च।

समयः - 10 निमेषाः

अङ्काः - 5

**मूल्यनिर्णयसूचकाः**

| | | |
|---|---|---|
| सूचनास्वीकाराय | - | 2 |
| विपुलीकरणाय | - | 2 |
| वाक्यघटनायाः | - | 1 |
| **आहत्य** | - | **5** |

## 2. प्रश्ननिर्देशः।

यथोचितं योजयत।

**प्रश्नपाठः - 2**

| *क* | *ख* |
|---|---|
| मनुष्यालयचन्द्रिका | वराहमिहिरः |
| मयमतम् | भास्कराचार्यः |
| विश्वकर्मप्रकाशः | मयः |
| बृहत्संहिता | तिरुमङ्गलत्तु नीलकण्ठमूसद् |
| | विश्वकर्मा |

**पाठ्यचर्योद्देश्यम्।**

वास्तुशास्त्रग्रन्थानां तेषां कर्तॄणां च परिचयं सम्पादयति।

**मानसिकव्यापारः**

अपग्रथनं, स्मरणं, विवेचनं च।

समयः - 4 निमेषाः

अङ्काः - 4

**मूल्यनिर्णयसूचकाः** एकैकस्य उत्तरस्य एकैकोऽङ्कः।

**उत्तरम् -**

| | |
|---|---|
| मनुष्यालयचन्द्रिका | तिरुमङ्गलत्तु नीलकण्ठमूसद् |
| मयमतम् | मयः |
| विश्वकर्मप्रकाशः | विश्वकर्मा |
| बृहत्संहिता | वराहमिहिरः |

# एककम् - ७ मानवधर्मः

# पाठः १० योगिनः सर्वसेवकाः

## 1. प्रश्ननिर्देशः।

कोष्ठकात् उचितम् उत्तरं निर्धार्य लिखत।

**प्रश्नपाठः - 1**

अधोदत्तेषु तपोवनाचार्यस्य जीवनचरितग्रन्थः कः?

(आत्मोपदेशशतकं, ईश्वरदर्शनं, भजगोविन्दम्)

**पाठ्यचर्योद्देश्यम्।**

जीवनचरितग्रन्थं परिचिनोति।

**मानसिकव्यापारः**

आशयग्रहणं, विवेचनञ्च।

समयः - 1 निमेषः

अङ्कः - 1

**मूल्यनिर्णयसूचकाः** उचितस्य उत्तरस्य एकोऽङ्कः।

**उत्तरम् -** ईश्वरदर्शनम्।

## 2. प्रश्ननिर्देशः।

उदाहरणानुसारं सन्धिच्छेदं लिखत।

**प्रश्नपाठः - 2**

उदा - श्रुत्वा + एव - श्रुत्वैव। एवं चेत्

भूत्वा + एव - ……………….।

**पाठ्यचर्योद्देश्यम्।**

सन्धिकार्याणि जानाति।

**मानसिकव्यापारः**

अपग्रथनम्, आशयग्रहणं, तुलनं च।

समयः - 1 निमेषः

अङ्कः - 1

**मूल्यनिर्णयसूचकाः** उचितस्योत्तरस्य एकोऽङ्कः।

**उत्तरम् -** भूत्वैव।

## 2. प्रश्ननिर्देशः।

कोष्ठकात् उचितम् उत्तरं निर्धार्य लिखत।

**प्रश्नपाठः - 2**

कः गणे नान्तर्भवति?

(कैलासयात्रा, विष्णुयमकं, नारायणीयम्।)

**पाठ्यचर्योद्देश्यम्।**

आधुनिकसंस्कृतसाहित्ये जीवनचरितानि सन्ति इत्यवबोधः।

**मानसिकव्यापारः**

आशयग्रहणं, विवेचनञ्च।

समयः - 1 निमेषः

अङ्कः - 1

**मूल्यनिर्णयसूचकाः** उचितस्य उत्तरस्य एकोऽङ्कः।

**उत्तरम् -** नारायणीयम्।

## 3. प्रश्ननिर्देशः।

उदाहरणानुसारम् उत्तरं लिखत।

**प्रश्नपाठः - 1**

उदा - नितरां तुष्टः - सन्तुष्टः। एवं चेत्।

नितरां तप्तः - ..................।

**पाठ्यचर्योद्देश्यम्।**

समस्तपदं जानाति।

**मानसिकव्यापारः**

अपग्रथनं, तुलनम्, आशयग्रहणम्।

समयः - 1 निमेषः

अङ्कः - 1

**मूल्यनिर्णयसूचकाः** उचितस्य उत्तरस्य एकोऽङ्कः।

**उत्तरम् -** सन्तप्तः।

## 4. प्रश्ननिर्देशः।

कोष्ठकात् उचितं पदं चित्वा पूरयत।

**प्रश्नपाठः - 4**

शान्तस्य भावः - शान्तता।

धृष्टस्य भावः - ................। (घृष्टता, धृष्टः, धृष्टम्)

**पाठ्यचर्योद्देश्यम्।**

समस्तपदं जानाति।

**मानसिकव्यापारः**

आशयग्रहणं, विवेचनञ्च।

समयः - 1 निमेषः

अङ्कः - 1

**मूल्यनिर्णयसूचकाः** उचितस्य उत्तरस्य एकोऽङ्कः।

**उत्तरम् -** धृष्टता।

## 5. प्रश्ननिर्देशः।

उदाहरणानुसारं सन्धिच्छेदं लिखत।

**प्रश्नपाठः - 5**

उदा - मुनिः + इव - मुनिरिव। एवं चेत्

निधिः + इव - ..................।

**पाठ्यचर्योद्देश्यम् ।**

सन्धिकार्याणि जानाति।

**मानसिकव्यापारः**

अपग्रथनं, तुलनम्।

समयः - 1 निमेषः

अङ्कः - 1

**मूल्यनिर्णयसूचकाः** उचितस्योत्तरस्य एकोऽङ्कः।

**उत्तरम् -** निधिरिव।

## 6. प्रश्ननिर्देशः ।

उदाहरणानुसारं पूरयत।

**प्रश्नपाठः - 6**

उदा - मनसः शान्ति - मनश्शान्ति। एवं चेत्।

आत्मनः शान्ति - ..................।

**पाठ्यचर्योद्देश्यम् ।**

समस्तपदानि जानाति।

**मानसिकव्यापारः**

अपग्रथनं, तुलनम्।

समयः - 1 निमेषः

अङ्कः - 1

**मूल्यनिर्णयसूचकाः** उचितस्य उत्तरस्य एकोऽङ्कः।

**उत्तरम् -** आत्मश्शान्ति।

## 7. प्रश्ननिर्देशः ।

उचितम् उत्तरं चित्वा लिखत।

**प्रश्नपाठः - 7**

सुरनदी इति प्रशस्ता नदी का?

(गङ्गा, यमुना, कावेरी)

**पाठ्यचर्योद्देश्यम्।**

समानार्थकपदं जानाति।

**मानसिकव्यापारः**

आशयग्रहणं, विवेचनञ्च।

समयः - 1 निमेषः

अङ्कः - 1

**मूल्यनिर्णयसूचकाः** गङ्गा।

उचितस्य उत्तरस्य एकोऽङ्कः।

## 8. प्रश्ननिर्देशः, प्रश्नपाठश्च।

केन योगिनः सर्वसेवकाः भवन्ति? (सत्सङ्गेन, आत्मविद्योपदेशेन, योगाभ्यासेन)

**पाठ्यचर्योद्देश्यम्।**

योगिनां जीवनचरितं विश्वमानविकताया पोषणे सहायकाः भवन्ति इति ज्ञानसम्पादनम्।

**मानसिकव्यापारः**

आशयग्रहणं, विवेचनञ्च।

समयः - 1 निमेषः

अङ्कः - 1

**मूल्यनिर्णयसूचकाः** उचितस्य उत्तरस्य एकोऽङ्कः।

**उत्तरम् -** आत्मविद्योपदेशेन।

## 9. प्रश्ननिर्देशः, प्रश्नपाठश्च।

कुत्राप्यलभ्यमाना अमूल्यनिधिः भवति - (मरतकम्, माणिक्यम्, आत्मशान्तिः)

**पाठ्यचर्योद्देश्यम्।**

योगिनां जीवनचरितं विश्वमानविकताया पोषणे सहायकाः भवन्ति इति ज्ञानसम्पादनम्।

**मानसिकव्यापारः**

आशयग्रहणं, विवेचनञ्च।

समयः - 1 निमेषः

अङ्कः - 1

**मूल्यनिर्णयसूचकाः** उचितस्य उत्तरस्य एकोऽङ्कः।

**उत्तरम् -** आत्मशान्तिः।

## 10. प्रश्ननिर्देशः, प्रश्नपाठश्च।

योगिनः सर्वसेवकाः विशदयत -

**पाठ्यचर्योद्देश्यम्।**

योगिनां जीवनचरितं विश्वमानविकताया पोषणे सहायकाः भवन्ति इति ज्ञानसम्पादनम्।

**मानसिकव्यापारः**

आशयग्रहणं, विवेचनञ्च।

समयः - 6 निमेषाः

अङ्काः - 3

**मूल्यनिर्णयसूचकाः** उचितस्य उत्तरस्य एकोऽङ्कः।

**उत्तरम् -** दुःखाग्निसन्तप्तेऽस्मिन् संसारे आत्मशान्तिः कुत्राप्यलभ्यमाना अमूल्यनिधिः भवति। अध्यात्मविद्योपदेशेन आत्मशान्तिः लभ्यते। अध्यात्मविद्योपदेशेनैव योगिनः सर्वेषां सेवकाः भवन्ति।

## 11. प्रश्ननिर्देशः, प्रश्नपाठश्च।

योगिनः सर्वसेवकाः इति पाठानुसारं योगिनां देशसेवा कथं भवितव्या इति स्ववाक्यैः लिखत।

**पाठ्यचर्योद्देश्यम्।**

योगिनां जीवनचरितं विश्वमानविकताया पोषणे सहायकाः भवन्ति इति ज्ञानसम्पादनम्।

**मानसिकव्यापारः**

आशयग्रहणम्, अपग्रथनम्, अवतरणं च।

समयः - 10 निमेषाः

अङ्काः - 4

**मूल्यनिर्णयसूचकाः** आशयस्य स्वीकाराय - 2

वाक्यपूर्णतायै - 2

**आहत्य - 4**

# पाठः ११ दीक्षान्तोपदेशः

## 1. प्रश्ननिर्देशः।

अधः प्रदत्तस्य वाक्यस्य समानाशययुक्तम् उपनिषद् वाक्यम् उद्धृत्य लिखत।

**प्रश्नपाठः - 1**

मातरं देवरूपेण उपास्ते।

(पितृदेवो भव, अतिथिदेवोभव, मातृदेवो भव)

**पाठ्यचर्योद्देश्यम्।**

उपनिषद्वाक्यानि परिचिनोति।

**मानसिकव्यापारः**

आशयग्रहणं, विवेचनञ्च।

समयः - 1 निमेषः

अङ्कः - 1

**मूल्यनिर्णयसूचकाः** उचितस्य उत्तरस्य एकः अङ्कः।

**उत्तरम् -** मातृदेवो भव।

## 2. प्रश्ननिर्देशः।

अधोलिखितस्य सन्दर्भस्य उचितम् उपनिषद् वाक्यं लिखत।

**प्रश्नपाठः - 2**

दिनेशः उत्तमः बालकः भवति। सः गृहमागतं सुहृदं स्वीकरोति। यथोचितं कुशलान्वेषणं करोति। समीचीनतया आतिथ्यमाचरति।

**पाठ्यचर्योद्देश्यम् ।**

भारतीयमूल्यानि प्रत्यभिजानाति।

**मानसिकव्यापारः**

आशयग्रहणं, स्मरणम्।

समयः - 2 निमेषाः

अङ्कः - 2

**मूल्यनिर्णयसूचकाः** उचितस्य उत्तरस्य एकोऽङ्कः।

**उत्तरम् -** अतिथिदेवो भव

## 3. प्रश्ननिर्देशः ।

प्रादेशिकभाषायां विवर्तयत।

**प्रश्नपाठः - 3**

भारतीयायुर्वेदाचार्यः भवति चरकः। प्रथमे शतके सः जीवनमकरोत् इति पण्डितानां मतम्। सः नलन्दा विश्वविद्यालये आचार्यपदवीम् अलङ्कृतवान् इति अपरे अभिप्रयन्ति। आयुर्वेदशास्त्रे तेन रचितः चरकसंहिताग्रन्थः प्रामाणिकः वर्तते। नियन्त्रितजीवनेन अरोगावस्था सिद्ध्यते इति सः अभिप्रैति स्म।

**पाठ्यचर्योद्देश्यम् ।**

भाषान्तरीकरणसामर्थ्यं सम्पादयति।

**मानसिकव्यापारः**

अपग्रथनं, मातृभाषायां समानपदचयनम्।

समयः - 10 निमेषाः

अङ्काः - 5

**मूल्यनिर्णयसूचकाः** एकैकस्य वाक्यस्य भाषान्तरीकरणाय एकैकोऽङ्कः।

## 4. प्रश्ननिर्देशः ।

खण्डिकां पठित्वा उत्तरं लिखत।

**प्रश्नपाठः - 4**

सनातनधर्मस्य प्रामाणिकग्रन्थाः भवन्ति वेदाः। वेदानाम् अन्तिमावयवाः उपनिषदः भवन्ति।

एताः वेदान्तः इत्यपि उच्यन्ते। आत्मविद्याप्रतिपादिका अनेकाः उपनिषदः प्रचलिताः दृश्यन्ते। तासु प्रसिद्धानां देशोपनिषदां भाष्यं श्रीशङ्कराचार्यैः विरचितं भवति।

1. शङ्कराचार्यैः विरचितानि उपनिषद् भाष्यानि कति सन्ति?
2. उपनिषदः कीदृशाः ग्रन्थाः भवन्ति?
3. इति + अवस्था - इत्यवस्था। एतादृशसन्धियुक्तं पदं खण्डिकातः चित्वा लिखत।
4. सनातनधर्मस्य प्रामाणिकग्रन्थः भवति ....................।

## पाठ्यचर्योद्देश्यम्।

खण्डिकां पठित्वा आशयम् अवगच्छति।

## मानसिकव्यापारः

अपग्रथनं, विवेचनम्।

समयः - 10 निमेषाः

अङ्कः - 4

**मूल्यनिर्णयसूचकाः** एकैकस्य उत्तरस्य कृते एकः अङ्कः।

## 5. प्रश्ननिर्देशः, प्रश्नपाठश्च।

विद्याभ्यासानन्तरं छात्रः कथं भवितव्यः इति उपनिषदुक्तदिशा सूचनाः अनुसृत्य ह्रस्वोपन्यासं लिखत।

सूचनाः - सत्यं - धर्मं - स्वाध्यायात् - देवपितृकार्याभ्यां - श्रद्धया - सुचरितानि - नो इतराणि।

## पाठ्यचर्योद्देश्यम्।

उपनिषदुपदेशानां स्वांशीकरणम्।

## मानसिकव्यापारः

अपग्रथनम्, आशयावगमः, आशयप्रकटनम्।

समयः - 10 निमेषाः

अङ्कः - 5

| | | | |
|---|---|---|---|
| **मूल्यनिर्णयसूचकाः** | सूचनानुसारम् आशयस्य स्वीकाराय | - | 2 |
| | वाक्यपूर्णतायै | - | 2 |
| | क्रमबद्धलेखनाय | - | 1 |
| | **आहत्य** | - | **5** |

## 6. प्रश्ननिर्देशः।

अधोदत्तेभ्यः वैयक्तिकोपदेशान्, पारिवारिकोपदेशान्, सामाजिकोपदेशान् च विविच्य लिखत।

**प्रश्नपाठः - 6**

| | |
|---|---|
| सत्यात् न प्रमदितव्यम् | अतिथि देवो भव |
| भूत्यै न प्रमदितव्यम् | संविदा देयम् |
| श्रद्धया देयम् | प्रजातन्तुं मा व्यवच्छेत्सीः |

## पाठ्यचर्योद्देश्यम्।

उपनिषदुपदेशानां स्वांशीकरणम्।

## मानसिकव्यापारः

अपग्रथनं, निर्णयः, विवेचनम्।

समयः - 12 निमेषाः

अङ्काः - 6

**मूल्यनिर्णयसूचकाः** एकैकस्य विवेचनाय एकैकोऽङ्कः।

| **उत्तरम् -** *वैयक्तिकोपदेशः* | *पारिवारिकोपदेशः* | *सामाजिकोपदेशः* |
|---|---|---|
| सत्यात् न प्रमादितव्यम् | प्रजातन्तुं मा व्यवच्छेत्सीः | श्रद्धया देयम् |
| भूत्यै न प्रमदितव्यम् | अतिथि देवो भव | संविदा देयम् |

**आहत्य - 6**

## 7. प्रश्ननिर्देशः, प्रश्नपाठश्च।

अन्तेवासनं प्रति आचार्यस्य अनुशासनं सूचनानुसारं लिखत।

सूचनाः - सत्यं - धर्मं - स्वाध्यायात् - देवपितृकार्याभ्यां - श्रद्धया - सुचरितानि - नो इतराणि।

## पाठ्यचर्योद्देश्यम्।

उपनिषदुपदेशानां स्वांशीकरणम्।

## मानसिकव्यापारः

अपग्रथनम्, आशयावगमः, आशयप्रकटनम्।

समयः - 10 निमेषाः

अङ्कः - 5

**मूल्यनिर्णयसूचकाः**

| | | |
|---|---|---|
| सूचनानुसारम् आशयस्य स्वीकाराय | - | 2 |
| वाक्यपूर्णतायै | - | 2 |
| क्रमबद्धलेखनाय | - | 1 |
| **आहत्य** | **-** | **5** |